TEACHING AID FOR NYĀYA

# A GRAPHIC REPRESENTATION OF NYĀYAPARIBHĀSĀ

Dr. P. M. PATTNAYAK

# TEACHING AID FOR NYĀYA

*A*

*Graphic Representation Of*

NYĀYAPARIBHĀSĀ

*Prepared By :*

*Dr. Pyarimohan Pattanayak*

**Reader In Sarvadarshan**

*SHREE JAGANNATH SANSKRIT VISHVAVIDYALAYA, PURI (ORISSA)*

A GRAPHIC REPRESENTATION OF NYĀYAPARIBHĀṢĀ

ublished by :- The Course Co-ordinator
U.G.C., Refresher Course in Sanskrit
(Language & Literature)
Shri Jagannath Sanskrit Vishwavidyalaya
Shrivihar, Puri.

c) by the author :-

Dr. Pyarimohan Pattanayak
Reader in Sarvadarsan

First Edition :- 1996

This edition is not to be sold.

Note :

No part of this book to be reproduced or transmitted in any form or by any means, electronical, including photocopying, recording or by any information storage and retrieval system without permission in writing from the author.

Printed at

Price : Rs 18500

चित्रसंख्या-1·

प्रथमचित्रे पदार्थस्य विभागः प्रदर्शितः । अत्र भावाभावभेदेन पदार्थः द्विधा विभज्यते । भावपदार्थः पुनः द्रव्यादिभेदेन षड्विधः अभावस्तु संसर्गाभाव-अन्योन्याभावभेदेन द्विधा । संसर्गाभावस्तु प्रागभावप्रध्वंसा-भावात्यन्ताभावभेदेन त्रिधा विभक्तः । अभावपदार्थः भावप्रतियोगिकः भावपदार्थनिरपेक्षेण अभावस्य कल्पनं न सम्भवति । द्रव्यगुणकर्मसामान्यविशेष-समवाय क्रमेण भावपदार्थानां निरूपणं कृतम् । गुणादिपञ्चानां द्रव्यवृत्तित्वात् द्रव्यस्य आदौ गणनाम् । यद्यपि द्रव्यगुणकर्मणां सत्तावत्त्वम् आवालगोपालानां सर्वेषां प्रत्यक्षविषयत्वं तथापि द्रव्यानन्तरं गुणस्य ग्रहणं गुणानान्तरं च कर्मणः ग्रहणं किमर्थमिति चेत् द्रव्ये कर्मणः कदाचित्कत्वं गुणस्य च कर्मापेक्षया आद्रव्यवृत्तित्वं तत्र कारणम् । सामान्यस्य द्रव्यगुणकर्मवृत्तित्वात् चतुर्थत्वम् । तदनन्तरं विशेषसमवाययोः क्रमः आपतति । तत्रापि उभयोः द्रव्यवृत्तित्वात् समवायविशेष इति व्युत्क्रमे का हानिरिति चेत् विशेषस्य नित्यद्रव्यमात्रवृत्तित्वात् समवायस्य तु द्रव्यादिपञ्चकवृत्तित्वात् विशेषस्य पञ्चमत्वं समवायस्य च षष्ठत्वमेव समीचीनम् । समवायस्य द्रव्यादिपञ्चकवृत्तित्वं नवमचित्रे प्रदर्शितम् ।

चित्रसंख्या-2·

चित्रेऽस्मिन् पदार्थानां साधर्म्यं प्रदर्शितम् । तत्र कृष्णरेखामाध्यमेन द्रव्यादित्रयाणां समान्यादि चतुर्णां च साधर्म्यं, रक्तरेखामाध्यमेन गुणकर्मणोः गुणादिषण्णां च साधर्म्यं, नीलरेखाद्वारा द्रव्यादिसप्तानां साधर्म्यं, द्रव्यादिषण्णां द्रव्यादिपञ्चानां च साधर्म्यं हरितरेखामाध्यमेन प्रदर्शितम् । अनेन चित्रेण द्रव्यादि पदार्थानां साधर्म्यं स्पष्टतया ज्ञातुं शक्यते ।

A GRAPHIC REPRESENTATION OF NYĀYAPARIBHĀṢĀ

Published by :- The Course Co-ordinator
U.G.C., Refresher Course in Sanskrit
(Language & Literature)
Shri Jagannath Sanskrit Vishwavidyalaya
Shrivihar, Puri.

(c) by the author :-
Dr. Pyarimohan Pattanayak
Reader in Sarvadarsan

First Edition :- 1996

This edition is not to be sold.

Note :

No part of this book to be reproduced or transmitted in any form or by any means, electronical, including photocopying, recording or by any information storage and retrieval system without permission in writing from the author.

Printed at

Price : Rs 1 8 5 0 0

चित्रसंख्या-1·

प्रथमचित्रे पदार्थस्य विभागः प्रदर्शितः । अत्र भावाभावभेदेन पदार्थः द्विधा विभज्यते । भावपदार्थः पुनः द्रव्यादिभेदेन षड्विधः अभावस्तु संसर्गाभाव-अन्योन्याभावभेदेन द्विधा । संसर्गाभावस्तु प्रागभावप्रध्वंसा-भावात्यन्ताभावभेदेन त्रिधा विभक्तः । अभावपदार्थः भावप्रतियोगिकः भावपदार्थनिरपेक्षेण अभावस्य कल्पनं न सम्भवति । द्रव्यगुणकर्मसामान्यविशेष-समवाय क्रमेण भावपदार्थानां निरूपणं कृतम् । गुणादिपञ्चानां द्रव्यवृत्तित्वात् द्रव्यस्य आदौ गणनाम् । यद्यपि द्रव्यगुणकर्मणां सत्तावत्त्वम् आवालगोपालानां सर्वेषां प्रत्यक्षविषयत्वं तथापि द्रव्यानन्तरं गुणस्य ग्रहणं गुणानान्तरं च कर्मणः ग्रहणं किमर्थमिति चेत् द्रव्ये कर्मणः कदाचित्कत्वं गुणस्य च कर्मापेक्षया आद्रव्यवृत्तित्वं तत्र कारणम् । सामान्यस्य द्रव्यगुणकर्मवृत्तित्वात् चतुर्थत्वम् । तदनन्तरं विशेषसमवाययोः क्रमः आपतति । तत्रापि उभयोः द्रव्यवृत्तित्वात् समवायविशेष इति व्युत्क्रमे का हानिरिति चेत् विशेषस्य नित्यद्रव्यमात्रवृत्तित्वात् समवायस्य तु द्रव्यादिपञ्चकवृत्तित्वात् विशेषस्य पञ्चमत्वं समवायस्य च षष्ठत्वमेव समीचीनम् । समवायस्य द्रव्यादिपञ्चकवृत्तित्वं नवमचित्रे प्रदर्शितम् ।

चित्रसंख्या-2·

चित्रेऽस्मिन् पदार्थानां साधर्म्यं प्रदर्शितम् । तत्र कृष्णरेखामाध्यमेन द्रव्यादित्रयाणां समान्यादि चतुर्णां च साधर्म्यं, रक्तरेखामाध्यमेन गुणकर्मणोः गुणादिषण्णां च साधर्म्यं, नीलरेखाद्वारा द्रव्यादिसप्तानां साधर्म्यं, द्रव्यादिषण्णां द्रव्यादिपञ्चानां च साधर्म्यं हरितरेखामाध्यमेन प्रदर्शितम् । अनेन चित्रेण द्रव्यादि पदार्थानां साधर्म्यं स्पष्टतया ज्ञातुं शक्यते ।

**चित्रसंख्या-3·**

अस्मिन् चित्रे नवद्रव्याणां नामानि न्यायपरिभाषाग्रन्थोक्तलक्षण-सहितानि प्रदर्शितानि ।

**चित्रसंख्या-4·**

चतुर्थचित्रे नवद्रव्याणां सामान्यभेदः प्रदर्शितः । तत्र पृथिवीजलतेजवायुनां नित्यानित्यभेदेन द्विविधत्वम् । अनित्यानां च शरीरेन्द्रिय-विषयभेदेन त्रिविधत्वम् । आकाशादिपञ्चानां नित्यत्वं च प्रदर्शितम् ।

**चित्रसंख्या-5·**

रेखाचित्रेऽस्मिन् पृथिव्यादिनवद्रव्येषु कुत्र कति गुणाः सन्ति । तत् कृष्णनीलपीतरक्तहरितकपिपरेखाभिः सुस्पष्ट रूपेण उट्टंकितम् ।

**चित्रसंख्या-6·**


षष्ठचित्रे सामान्यस्य निरूपणं कृतम् । तत्र सामान्यस्य सामान्यलक्षणं परापरसामान्ययोः स्वरूपं निरूपितम् । कथं च सत्ता व्यापकतया द्रव्यगुणकर्मषु तिष्ठति ? सतापेक्षया द्रव्यगुणकर्मणां अल्पदेशवृत्तित्वं परापरसामान्यत्वं च कथं भवति । तस्य चित्रणं कृतम् ।


**चित्रसंख्या-7·**


सप्तमचित्रे विशेषनामक पदार्थस्य लक्षणं प्रतिपदसार्थक्य प्रदर्शनपूर्वकं उपस्थापितम् । पुनश्च नवद्रव्येषु कानि अन्त्यनित्यद्रव्याणि तदपि प्रदर्शितम् ।

चित्रसंख्या - 1

**पदार्थः-२**





चित्रसंख्या - २
पदार्थानां साधर्म्यम्
सप्त पदार्थाः
1 द्रव्यम्
2 गुणः
3 कर्म
4 सामान्यम्
5 विशेषः
6 समवायः
7 अभावः
त्रयाणां सत्तावत्त्वम्
द्वयोः असमवायिकारणत्वम्
षण्णां भावत्वम्
सप्तानां ज्ञेयत्वं, वाच्यत्वं, प्रमेयत्वादि।
पारिमाण्डल्य-भिन्नानां सत्तानां कारणत्वम्
पञ्चानां समवायित्वम्
पञ्चानाम् निर्गुणत्वम् निष्क्रियत्वम्
चतुर्णां जातिशून्यत्वम्


चित्रसंख्या - ३
द्रव्यम् - 1
द्रव्यम्
पृथिवी
गन्धवती पृथिवी नानारूपवती च
अप्
स्नेहवत्य आपः
तेजः
उष्णस्पर्शवत् तेजः
वायुः
अपाकजानुष्णाशीतस्पर्शवान्
आकाशम्
शब्दगुणमाकाशम्
कालः
जन्यानां जनकः कालः
दिक्
प्राच्यादिव्यवहारहेतुः
आत्मा
इन्द्रियाणां प्रेरको ज्ञानाश्रयः
मनः
जन्यज्ञानमात्रे निमित्तकारणम्


चित्रसंख्या - 4


## द्रव्याणि






चित्रसंख्या - 5

## द्रव्येषु गुणाः




चित्रसंख्या - 6
सामान्यम्
नित्यम्
एकम्
अनेकानुगतम्
सत्ता
व्यापकत्वात्
① परसामान्यम्
सत्तापेक्षया अव्यापकत्वाद् परम्
नव द्रव्याणि
चतुर्विंशति गुणाः
पञ्च कर्माणि
द्रव्यत्वम्
गुणत्वम्
कर्मत्वम्
② परापरसामान्यम्
पृथिवीत्वाद्यपेक्षया व्यापकत्वात् परम्
पृथिवीत्वम्
रूपत्वम्
उत्क्षेपणत्वम्
③ अपरसामान्यम्
द्रव्यत्वाद्यपेक्षया अव्यापकत्वात्


चित्रसंख्या - 7
विशेषः
विशेषः
क अन्त्यः
ख नित्यद्रव्यवृत्तिः
ग अनन्तः
अन्ताः
नित्याः
पार्थिव परमाणवः
कार्यरूपा पृथिवी
जलीय परमाणवः
कार्यरूपं जलम्
तैजस परमाणवः
कार्यरूपं तेजः
वायवीय परमाणवः
कार्यरूपः वायुः
आकाशः
कालः
दिक्
आत्मा
मनः
नवद्रव्याणि
अनित्याः
नित्याः
अन्ताः
निरवयवाः
क अन्त्यत्वम्
अन्ते (अवसाने-निरवयवद्रव्ये) वर्तमानत्वम्
स्वतोव्यावृत्तत्वम्
स्वाश्रयव्यावर्तकत्वम्
स्वप्रयोज्य-स्वनिष्ठ स्वसजातीयप्रतियोगिकभेदकत्वम्
स्वाश्रयद्रव्यं द्रव्यान्तरात् व्यावर्तयति
ख नित्यद्रव्यवृत्तित्वम्
नित्यद्रव्येषु पार्थिवजलीयतैजसवायवीयपरमाणुषु आकाशादिषु वर्तमानत्वम्
ग अनन्तत्वम्
असंख्येयत्वम्




**चित्रसंख्या-8·**

चित्रेऽस्मिन् समवायस्य लक्षणं निरूपयित्वा कयोः कयोः मध्ये समवायाम्न्वयो भवति तन्निरूपितम् । तत्र च समवायसमन्वस्य कः अनुयोगी कश्च प्रतियोगी तत् सर्वं प्रदर्शितम् । एतस्मिन्नेव चित्रे का अविनस्यदवस्था ? का च विनस्यदवस्था ? तदपि निरूपितम्

**चित्रसंख्या-9·**

अत्र चित्रद्वयेन समवायस्य द्रव्यादिपञ्चकनिष्ठत्वं सरलतया प्रदर्शितम् ।

**चित्रसंख्या-10·**

चित्रमेतत् अव्याप्ति-अतिव्याप्ति-असम्भवदोषाणां लक्षणानि सोऽदाहरणं प्रदर्शयति ।

**चित्रसंख्या-11 तः 15·**

क्रमशः पञ्चरेखाचित्रेषु दण्डत्व-दण्डरूप-आकाश-कुलालपितृ रासभानां घटं प्रति अन्यथासिद्धत्वं प्रदर्श्य कथं तानि घटं प्रति न कारणानि तत् तत्र तत्र विभिन्न लक्षणद्वारा चित्रमाध्यमेन च प्रदर्शितम् ।

**चित्रसंख्या-16·**

षोड़शचित्रे कर्मणां संख्या प्रदर्शिता । उत्क्षेपणादि पञ्चकर्मणां नामानि तत्र च गमने भ्रमणादीनां अन्तर्भावः चित्रमाध्यमेन प्रदर्शितः ।

**चित्रसंख्या-17·**

चित्रेऽस्मिन् कारण — लक्षणं निरूपितम् । ग्रन्थकारेण तत्र नियतशब्दस्य व्यापकत्वम् अर्थः प्रदर्शितः । "स्वसमानाधिकरणात्यन्ताभावा-प्रतियोगित्वम्" इति व्यापकत्व लक्षणम् ।

**चित्रसंख्या-18·**

अष्टादशचित्रं कारणस्य त्रैविध्यं निरूपयति । घटकार्यं प्रति मृत्तिकायाः समवायिकारणत्वम् कपालसंयोग असमवायिकारणम् । कुलाल-दण्ड-चक्र-सूत्रादीनां निमित्तकारणत्वं चित्रद्वारा प्रदर्शितम् ।

**चित्रसंख्या-19·**

चित्रेऽस्मिन् समवायिकारणस्य लक्षणं घटपटादि - दृष्टान्तेन चित्रितम् । असमवायिकारणस्यापि निरूपणम् अत्र प्रदत्तमस्ति ।

**चित्रसंख्या-20·**


अस्मिन् रेखाचित्रे पृथिव्यादि - नवद्रव्याणां साधर्म्यं स्पष्टतया प्रकाशितम् ।

**चित्रसंख्या-21·**

एकविंशतितमेचित्रे पृथिव्याः लक्षणं भेदश्च निरूपितः । तत्र कति गुणाः सन्ति तेषु के पाकजाः के च अपाकजाः तत् सर्वं प्रदर्शितम् ।


**चित्रसंख्या-22 तः 27·**

द्वाविंशतितमचित्रात् सप्तविंशतितम -चित्रं यावत् जलतेजोवाय्वा-काशकालदिशां लक्षणानि भेदश्च प्रदर्शिताः । तेषु के के गुणाः तिष्ठन्ति तदपि निरूपितम् । चित्रेभ्य एव तत् स्पष्टं भविष्यति इति वर्ण्णनं नापेक्षते ।




चित्रसंख्या -10

## लक्षणदोषाः





चित्रसंख्या -11

## प्रथमान्यथासिद्धः




चित्रसंख्या -12

द्वितीयान्यथासिद्धः





चित्रसंख्या - 13

तृतीयान्यथासिद्धः




चित्रसंख्या - 14

## चतुर्थ अन्यथासिद्धः





चित्रसंख्या - 15

## पञ्चम अन्यथासिद्धः





यद्यपि घटपूर्ववृत्तिः तथापि न कारणम् अन्यथासिद्धत्वात्


चित्रसंख्या -16





चित्रसंख्या - 17




चित्रसंख्या - 18





चित्रसंख्या - 19



चित्रसंख्या -20





चित्रसंख्या - 21




चित्रसंख्या - 22


## जलम्






चित्रसंख्या - 23

## तेजः




चित्रसंख्या - 24
वायुः
अपाकजानुष्णाशीतस्पर्शवत्वम्
तिर्यग्गमनवत्वम्
लक्षणम्
वायुः
तत्र
स्पर्शः 1
अनुष्णाशीतः
विशेषगुणः
संख्या 2
परिमाणम् 3
पृथक्त्वम् 4
संयोगः 5
विभागः 6
परत्वम् 7
अपरत्वम् 8
वेगाख्य संस्कारः 9
नवगुणाः
भेदः
नित्यवायुः
अनित्यवायुः
परमाणुरूपः
कार्यरूपः
देहः
वायुलोके प्रसिद्धः
इन्द्रियम्
देहव्यापि त्वगिन्द्रियम्


चित्रसंख्या - 25
आकाशम्
शब्दगुणकम्
लक्षणम्
आकाशम्
तत्र
संख्या 1
परिमाणम् 2
पृथक्त्वम् 3
संयोगः 4
विभागः 5
शब्दः 6
सामान्यगुणाः
श्रोत्रग्राह्यगुणः
विशेषगुणः
षड्गुणाः
नित्यम्
एकम्
अपि
उपाधिभेदेन अनेकम्
उपाधिः
कर्णशष्कुली
घटः
उपाधिः
मठः
उपाधिः
श्रोत्रेन्द्रियम्
घटावच्छिन्नाकाशम्
मठावच्छिन्नाकाशम्




**चित्रसंख्या-28**

अत्र इन्द्रियाणां प्रेरकत्वेन आत्मा प्रदर्शितः । तस्य नित्यत्वं ज्ञानाश्रयत्वं कर्त्तृत्वं विभुत्वं च निरूपितम् । 1- शरीरस्य अनित्यत्वात् न आत्मत्वम्, 2- इतीन्द्रियाणां जड़त्वात् नात्मत्वम्, 3- मनसः अणुत्वात् नात्मत्वम्, 4- इन्द्रियाणां प्रेरकत्वात् आत्मन्येः कर्त्तृत्वं तत्र प्रदर्शितम् । जीवात्मपरमात्मभेदेन आत्मभेदं प्रदर्श्य जीवात्मनः अहंशब्दवाच्यत्वं परमात्मनः श्रुतिस्मृतीहासपुराणसिद्धत्वं वर्णीतम् । जीवात्मनः चतुर्दशगुणाश्रयत्वं प्रति शरीरं भिन्नत्वं नानात्वं च प्रदर्शितम् । परमात्मनः एकत्वं अष्टगुणाश्रयत्वं निरूपितम् ।

**चित्रसंख्या-29**

अस्मिन् चित्रे जन्यज्ञानमात्रे निमित्तकारणं मन इति लक्षणस्य समन्वयः चित्रेण प्रदर्शितम् । तत्र जन्यज्ञानं कार्यम्, आत्मनि समवायसम्बन्धेन उत्पद्यमानत्वात् आत्मा समवायिकारणम् । आत्ममनस्संयोगो असमवायिकारणम् संयोगाश्रयतया मनः निमित्तकारणमिति चित्राङ्कितम् । संख्यादि अपरत्वान्तं वेगाख्यसंस्कारसहितम् अष्टौ गुणाः मनसि तिष्ठन्ति इति तत्रैव प्ररूपितम् ।

**चित्रसंख्या-30**

अस्मिन् चित्रे गुणलक्षणं निरूपितम् ।

**चित्रसंख्या-31 ततः 33**

एतेषु चित्रेषु गुणानां साधर्म्यं प्रदर्शितम् ।

**चित्रसंख्या-34**

चित्रमिदं रूपस्य लक्षणं भेदं च प्रकाशयति ।

**चित्रसंख्या-35**

चित्रेऽस्मिन् रसस्य लक्षणं भेदश्च निरूपितौ ।

**चित्रसंख्या-36 तः 39·**

एतेषु चित्रेषु क्रमशः गन्ध-स्पर्श-संख्या-परिमाणानां निरूपणं कृतम् ।

**चित्रसंख्या-40·**

चत्वारिंशत्तमे चित्रे संयोगस्य लक्षणं निरूपयित्वा अन्यतरकर्मज-संयोगं, उभयकर्मजसंयोगं, संयोगजसंयोगं च चित्रितम् । तत्र प्रथमचित्रे शैलोपरि श्येनः आगत्य वसति शैले कर्म नास्ति परन्तु श्येनस्य कर्मणा श्येनशैलसंयोगः सम्भवति । अयमेव एकतरकर्मजः संयोगः ।

द्वितीयचित्रे द्वयोः मेषयोः संयोगः उभयमेषयोः कर्मभ्यां सम्भवति ।

तृतीयचित्रे हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः सम्भवति अयं संयोगजसंयोगः ।

**चित्रसंख्या-41·**


चित्रेऽस्मिन् संयोगस्य प्रकारान्तरेण विभागः प्रदर्शितः । तत्र अभिघाताख्यसंयोगः एकस्य द्रव्यस्य द्रव्यान्तरेण संघातात् शब्दोत्पादन-पूर्वकं सम्भवति । शब्दं न जनयित्वा यः संयोगः सम्भवति असौ नोदनाख्यसंयोगः । अपरश्च संयोगः प्रचयाख्यः यथा तूलपिण्डयोः शिथिलाख्यावयवसंयोगः । अपरोऽपि संयोगविशेषो वर्त्तते यस्तु संग्रहाख्यसंयोगः

**चित्रसंख्या-42·**


चित्रेऽस्मिन् विभागस्य निरूपणं कृतम् । तत्रापि एकतरकर्मजविभागः, उभयकर्मजविभागः, विभागजविभाग इति त्रिधा भेदः प्रदर्शितोऽस्ति ।

चित्रसंख्या-27


## दिक्





चित्रसंख्या - 28






चित्रसंख्या - 29






चित्रसंख्या - 30
गुणलक्षणम्
गुणोऽयं गुणोऽयमिति प्रतीतेः
गुणत्वजातिमत्त्वम्
लक्षणम्
गुणः
द्रव्याश्रितत्वम्
द्रव्यसमवेतत्त्वम्
कर्मण्यतिव्याप्तिः
कर्मणः अमूर्त्तद्रव्य-
समवेतत्वं नास्ति
यावद्द्रव्य- -समवेतत्त्वम्
मूर्त्तामूर्त्तद्रव्य- -समवेतत्त्वम्
मूर्त्तद्रव्याणि
अमूर्त्तद्रव्याणि
पृथिवी
जलम्
तेजः
वायुः
मनः
आकाशम्
कालः
दिक्
आत्मा


चित्रसंख्या - 31
गुणानां साधर्म्यम् - 1
24 गुणाः
रूपम्
रसः
गन्धः
स्पर्शः
संख्या
परिमाणम्
पृथक्त्वम्
संयोगः
विभागः
परत्वम्
अपरत्वम्
गुरुत्वम्
द्रवत्वम्
स्नेहः
शब्दः
बुद्धिः
सुखम्
दुःखम्
इच्छा
द्वेषः
प्रयत्नः
धर्मः
अधर्मः
संस्कारः
बाह्यैकैकेन्द्रियग्राह्याः
5
विशेषगुणाः
16
सामान्यगुणाः
10
अमूर्त्तद्रव्यगुणाः
10
मूर्त्तद्रव्यगुणाः
10
मूर्त्तामूर्त्तद्रव्यगुणाः
5
अनेकद्रव्यवृत्तयः
3
आन्तरेन्द्रियग्राह्याः
6



चित्रसंख्या-32
गुणानां साधर्म्यम्-2
24 गुणाः
रूपम्
रसः
गन्धः
स्पर्शः
संख्या
परिमाणम्
पृथक्त्वम्
संयोगः
विभागः
परत्वम्
अपरत्वम्
गुरुत्वम्
द्रवत्वम्
स्नेहः
शब्दः
बुद्धिः
सुखम्
दुःखम्
इच्छा
द्वेषः
प्रयत्नः
धर्मः
अधर्मः
संस्कारः
असमवायिकारणत्वम्
(4)
एकपृथक्त्वम्
द्वीन्द्रियग्राह्याः
(10)
वेगः
कर्मजन्याः
(3)
वेगः
निमित्तकारणत्वम्
(9)
अकारणगुणोत्पन्नाः
(10)
भावना
अतीन्द्रियगुणाः


चित्रसंख्या-33
गुणानां साधर्म्यम्-3
24 गुणाः
रूपम्
रसः
गन्धः
स्पर्शः
संख्या
परिमाणम्
पृथक्त्वम्
संयोगः
विभागः
परत्वम्
अपरत्वम्
गुरुत्वम्
द्रवत्वम्
स्नेहः
शब्दः
बुद्धिः
सुखम्
दुःखम्
इच्छा
द्वेषः
प्रयत्नः
धर्मः
अधर्मः
संस्कारः
अपाकजाः
कारणगुणोत्पन्नाः
(11)
निमित्तकारणत्वम्
असमवायिकारणत्वम्
(6)
वेगः
अव्याप्यवृत्तिगुणाः
(11)



चित्रसंख्या - 34
रूपम्
चक्षुरिन्द्रियग्राह्यम्
नित्यम्
परमाणुवृत्ति
रूपम्
अनित्यम्
घटपटादिवृत्ति
उद्भूतरूपम्
अनुद्भूतरूपम्
घटपटादिवृत्ति
अनुद्भूतरूपंघ्राणेन्द्रियवृत्ति
बहिर्द्रव्यप्रत्यक्षे कारणम्
चक्षुषः सहकारि
शुक्लम्
नीलम्
पीतम्
रक्तम्
हरितम्
कपिशम्
चित्रम्


चित्रसंख्या - 35
रसः
रसनेन्द्रियग्राह्यगुणः
नित्यः
जलपरमाणुवृत्ती
रसः
अनित्यः
तद्भिन्नरसः
उद्भूतरसः
अनुद्भूतरसः
जलफलादिवृत्तिः
रसनेन्द्रियवृत्तिः
रसनेन्द्रियसहकारी
लवणः 1
अम्लः 2
मधुरः 3
कटुः 4
कषायः 5
तिक्तः 6
षड्विधः


चित्रसंख्या - 36





चित्रसंख्या - 37





चित्रसंख्या - 38





चित्रसंख्या - 39






चित्रसंख्या - 40
संयोगः - 1
अप्राप्तपदार्थयो यः सम्बन्धः
संयोगः
1
अन्यतरकर्मजसंयोगः
श्येने कर्म
न
पर्वते
पर्वते श्येनसंयोगः
2
उभयकर्मजसंयोगः
मेषयोः संयोगः
3
संयोगजसंयोगः
कविता
हस्तपुस्तकसंयोगात्कायपुस्तकसंयोगः

चित्रसंख्या - 41
संयोगः - 2
संयोगः
अभिघाताख्य संयोगः
नोदनाख्य संयोगः
प्रचयाख्य संयोगः
शब्दजनको यः सम्बन्धः
शब्दाजनको यः सम्बन्धः
तूलपिण्डयोः
शिथिलख्यावयवसंयोगः
कर्मजः संयोगो द्विविधः
संग्राहाख्य संयोगः
अपि
संयोगविशेषः

चित्रसंख्या - 42

## विभागः




चित्रसंख्या-43·

अत्र कालिकपरत्वापरत्वयोः निरूपणं कृतम् । ज्येष्ठापेक्षया कनिष्ठे कालिकापरत्वं, कनिष्ठापेक्षया ज्येष्ठे कालिकपरत्वं चित्रितम् । कालिकपरत्वरूपं कार्यं प्रति ज्येष्ठस्य पिण्डं समवायिकारणं, पिण्डकालसंयोगः असमवायिकारणं कनिष्ठपिण्डापेक्षाबुद्धिः निमित्तकारणं भवति । तथैव कालिकाऽपरत्वरूपं कार्यं प्रति कनिष्ठस्य पिण्डं समवायिकारणं, पिण्डकाल-संयोगः असमवायिकारणं, ज्येष्ठपिण्डापेक्षाबुद्धिः निमित्तकारणं भवति ।

चित्रसंख्या-44·

चित्रेऽस्मिन् दैशिकपरत्वापरत्वयोः निरूपणं जातम् । दूरस्थपदार्थस्य समीपस्थपदार्थापेक्षया परत्वं विद्यते, समीपस्थपदार्थस्य दूरस्थपदार्थापेक्षया अपरत्वं विद्यते । तत्रापि कालिकपरत्वापरत्ववत् दैशिकपरत्वा-परत्वरूपं कार्यं प्रति समवायि-असमवायिनिमित्तकारणानां स्वरूपं ऊहनीयम् ।

चित्रसंख्या-45·

इदं चित्रं बुद्धेः स्वरूपं तस्याः उपलब्धिः ज्ञानं च अनर्थान्तरमिति निरूपणं करोति । तत्र ज्ञानं स्मृत्यनुभवभेदेन द्विविधम् अनुभवात् संस्कारः आत्मनि जायते । संस्कारात् स्मृतिः उत्पद्यते । अनुभवस्य प्रत्यक्षानुमित्युपमितिशाब्दभेदेन चतुर्धा विभागः । प्रत्यक्षस्य पुनः निर्विकल्पक-सविकल्पकभेदेन द्विविधत्वमप्यत्र प्रदर्शितम् ।

चित्रसंख्या-46·

इदं चित्रम् इच्छास्वरूपं निरूपयति । तत्रापि इच्छायाः भेदः कः ? कारणं किम् ? तत्सर्वं प्रकाशितम् ।

**चित्रसंख्या-47 :**

ग्रन्थकारमतानुसारेण अत्रः देषप्रयत्नयोः निरूपणमस्ति । प्रवृत्तिनिवृत्तिजीवनयोनि भगवद्यत्नभेदेन प्रयत्नस्य चत्वार भेदाः अत्र निरूपिताः ।

**चित्रसंख्या-48 :**

चित्रेऽस्मिन् गुरुत्वलक्षणं भेदश्च वर्णितौ । नारिकेलवृक्षात् नारिकेलफलरूपद्रव्यस्य आद्यपतनं प्रति तत्फलगतगुरुत्वमसमवायिकारणमिति चित्रेण प्रतिपादितम् । पतनं कार्यम् । फलं समवायिकारणं, फले समवाय-सम्बन्धेनवर्त्तमानं गुरुत्वमसमवायिकारणम् ।

**चित्रसंख्या-49 :**


इदं चित्रं द्रवत्वस्य स्वरूपं भेदं च निरूपयति । तत्र सांसिद्धिकद्रवत्वं जले वर्त्तते । तापजनितनैमित्तिकद्रवत्वं घृतजतुसुवर्णादिद्रव्यवृत्ति कथं द्रवत्वम् आद्यस्यन्दनं प्रति असमवायिकारणं भवति तदपि चित्रेणाऽनेन प्रकाशितम् ।

**चित्रसंख्या-50 :**

अस्मिन् चित्रे संस्कारस्य भेदः निरूपितः । तत्र वेगाख्यसंस्कारः कर्मजन्यः मूर्त्तद्रव्यमात्रवृत्तिः । मूर्त्तद्रव्याणि च पृथिव्यापस्तेजोवायुमनांसि । भावनाख्यसंस्कारः निश्चयज्ञानजन्यः, आत्ममात्रवृत्तिः । स्थितिस्थापकाख्यसंस्कारः पृथिवीमात्रवृत्तिरिति प्रदर्शितम् ।


**चित्रसंख्या-51 :**

चित्रेऽस्मिन् शब्दस्य लक्षणं भेदश्च प्रकाशितौ । शब्दकार्यं प्रति समवायसमवायिनिमित्तकारणानां निरूपणं शब्दनाशप्रक्रियानिरूपणं च कृतम् ।




चित्रसंख्या - 44


## परत्वापरत्वम् - 2





चित्रसंख्या - 45

## बुद्धिः





चित्रसंख्या - 46
इच्छा
सुखम्
दुःखाभावः
इष्टम्
इच्छा
(इष्टम्)
फलम्
(स्वर्गः)
फलम्
फलेच्छा
अधीना
उपायेच्छा
उपायः
(यागः)
कार्यम्
कार्यम्
कारणम्
कारणम्
फलज्ञानं कारणम्
इष्टसाधनताज्ञानम्
साधनम्
अधीना
सुख-
साधनम्
दुःखाभाव
साधनम्
यागः
इदं मत्कृति(प्रयत्न) साध्यम्
इति
ज्ञानम्
कृतिसाध्यत्वप्रकारकेच्छां
चिकीर्षा
प्रति कारणम्


चित्रसंख्या - 47
द्वेषः
द्विष्टसाधनताज्ञानं कारणम्
द्वेषं
कार्यं प्रति
प्रयत्नः
प्रयत्नः
प्रवृत्तिः
निवृत्तिः
जीवनयोनिः
(अतीन्द्रियः)
भगवद्यत्नः
कार्यम्
कार्यम्
प्राणसंचारे हेतुः
जन्यमात्रे हेतुः
1
इष्टसाधनताज्ञानम्
कारणम्
2
बलवदनिष्टाननुबन्धित्वज्ञानम्
3
कृतिसाध्यताज्ञानम्
कारणम्
अनिष्टसाधनताज्ञानम्


चित्रसंख्या - 48

## गुरुत्वम्





चित्रसंख्या - 49

## द्रवत्वम्



चित्रसंख्या - 50

## संस्कारः




चित्रसंख्या-52·

इदं चित्रं प्रमाणस्य सामान्यलक्षणं प्रतिपदव्यावृत्या दोषसमुद्-घाटनपुरस्सरं यथार्थतया प्रतिपादयति ।

चित्रसंख्या-53·

चित्रेऽस्मिन् प्रत्यक्षादिप्रमाणचतुष्टयस्य सन्निकर्षादिव्यापारचतुष्टयस्य प्रत्यक्षादिफलचतुष्टयस्य च निरूपणं कृतम् ।

चित्रसंख्या-54·

अस्मिन् रेखाचित्रे चक्षुघ्राणरसनत्वक्कर्णेन्द्रियाणां प्रत्यक्षप्रमाकरणानां यथाक्रमं रूपगन्धरसस्पर्शशब्दविषयकप्रमाज्ञानजनकत्वं प्रदर्श्य प्रत्यक्षप्रमाणनिरूपणं कृतम् ।

चित्रसंख्या-55·

अस्मिन् चित्रे व्यापारस्य लक्षणं चित्रमाध्यमेन परिस्कृतम् सन्निकर्षस्य भेदश्च प्रदर्शितः ।

चित्रसंख्या-56·

इदं चित्रं चक्षुरिन्द्रियस्य ग्राह्यविषयान् निरूपयति । चक्षुषप्रत्यक्षे सहकारिकारणानि च प्रदर्शयति ।

चित्रसंख्या-57·

सप्तपञ्चाशत्तमचित्रे चक्षुरिन्द्रियेण घटप्रत्यक्षे संयोगसन्निकर्षः, घटगतरूपप्रत्यक्षे चक्षुसंयुक्तसमवायसन्निकर्षः घटरूपगतरूपत्वजातिप्रत्यक्षे चक्षुसंयुक्तसमवेतसमवायसन्निकर्षो भवति इति प्रदर्शितम् ।

घ्राणेन्द्रियेण चम्पकनिष्ठगन्धप्रत्यक्षे घ्राणसंयुक्तसमवायसन्निकर्षः, गन्धगतगन्धत्वजातिप्रत्यक्षे संयुक्तसमवेतसमवायसन्निकर्षो भवतीति प्रदर्शितम् ।

चित्रसंख्या-58·

चित्रेऽस्मिन् रसनेन्द्रियेण शर्करानिष्ठमधुररसप्रत्यक्षे संयुक्तसमवाय-सन्निकर्षः, मधुरत्वजातिप्रत्यक्षे च संयुक्तसमवेतसमवायसन्निकर्षो भवतीति चित्रितम् ।

त्वगिन्द्रियेण जलगतशीतस्य प्रत्यक्षे संयुक्तसमवायसन्निकर्षः, शीतत्वजातिप्रत्यक्षे च संयुक्तसमवेतसमवायसन्निकर्षो भवतीति चित्रितम् ।

मनसा आत्मप्रत्यक्षे संयोगसन्निकर्षः, आत्मनिष्ठसुखस्य प्रत्यक्षे संयुक्तसमवायसन्निकर्षः, सुखत्वजातिप्रत्यक्षे मनःसंयुक्तसमवेतसमवायसन्निकर्षो भवतीति प्रतिपादितम् ।

चित्रसंख्या-59·

चित्रेऽस्मिन् कर्णेन्द्रियेण शब्दप्रत्यक्षे समवायसन्निकर्षो भवतीति प्रदर्शितम् । कर्णशष्कुल्यावच्छिन्नाकाशस्य कर्णेन्द्रियत्वात् शब्दस्य च आकाशगुणत्वात् गुणगुणिनोः समवायसम्बन्धवत्त्वात् तत्र शब्दकर्णयोः समवायसम्बन्धो भवति । पुनश्च शब्दगतजातिप्रत्यक्षे समवेतसमवायसन्निकर्षो भवतीति तत्र चित्रितम् ।


चक्षुरिन्द्रियेण भूतले घटाभावस्य प्रत्यक्षे चक्षुसंयुक्तविशेष-गतारूपसन्निकर्षः व्यापारः, भूतलस्य विशेष्यत्वात् घटाभावस्य भूतलं प्रति विशेषणत्वात् ।

समवायसम्बन्धस्यापि प्रतक्षं संयुक्तविशेषमतारूपसन्निकर्षेण भवतीति तत्र प्रदर्शितमस्ति ।

चित्रसंख्या-60 तः 63·


षष्ठीतमचित्रं प्रागभावं निरूपयति ।. एकषष्ठीतमचित्रं प्रध्वंसा-भावस्य, द्विषष्ठीतमचित्रं अत्यन्ताभावस्य, त्रिषष्ठीतमचित्रं अन्योन्याभावस्य च निरूपणं करोति ।


चित्रसंख्या - 51




अत्र - 1 शब्दः 2य शब्दनाश्यः ।
2 यशब्दः 3य शब्दनाश्यः ।
3 यशब्दः 4र्थशब्दनाश्यः ।
4 र्थशब्दः 5मशब्दनाश्यः ।
5 मशब्दः 6ष्ठ (उपान्त्य) शब्दनाश्यः ।


सुन्दोपसुन्दन्यायेन → 6 ष्ठ (उपान्त्य) शब्दः 7 म (अन्त्य) शब्दनाश्यः ।
→ उपान्त्यशब्दनाशात् अन्त्य (7म) शब्दनाशः ।


चित्रसंख्या – 52
प्रमाणम्
लक्षणम्
लक्ष्यम्
प्रमा
करणम्
प्रमाणम्
यथार्थ - अनुभवः प्रमा
① अनुभवः प्रमा
इत्येव लक्षणे सति
भ्रमेऽतिव्याप्तिः
शुक्ताविदं रजतम् इति भ्रमज्ञानमपि
अनुभवः परन्तु अयथार्थानुभवः तस्य प्रमात्ववारणाय 'यथार्थ' इति पदम्
② यथार्थत्वम्
प्रमात्वमित्यत्र
इच्छायामतिव्याप्तिः
इच्छायाः रजतत्वबुद्धिविशेष्यक-रजतत्वप्रकारकत्वात्
③ यथार्थज्ञानं प्रमा
इति लक्षणे सति - स्मृतौ अतिव्याप्तिः
अतिव्याप्तिवारणाय 'अनुभव' पदम्
अयथार्थत्वम्
तद्वति तत्प्रकारकत्वं यथार्थत्वम्
शुक्तित्ववति शुक्तौ शुक्तित्वप्रकारकत्वम्
तदभाववति तत्प्रकारकत्वम् अयथार्थत्वम्
रजतत्वाभाववति शुक्तौ रजतत्वप्रकारकत्वम्


चित्रसंख्या – 53
प्रमाणभेदः
प्रमाणम्
व्यापारः
फलम्
1 प्रत्यक्षम्
सन्निकर्षः
प्रत्यक्षम्
2 अनुमानम्
परामर्शः
अनुमितिः
3 उपमानम्
अतिदेशवाक्यार्थस्मरणं
उपमितिः
4 शब्दः
पदार्थज्ञानम्
शाब्दः


चित्रसंख्या - 54

# प्रत्यक्षप्रमाणम्





चित्रसंख्या - 55

# व्यापारः




चित्रसंख्या - 56


## चक्षुरिन्द्रियग्राह्यविषयाः के ?




चित्रसंख्या - 57


## सन्निकर्षः 1








चित्रसंख्या - 58

## सन्निकर्षः - 2













चित्रसंख्या - 59

## सन्निकर्षः - 3





चित्रसंख्या - 60

## प्रागभावः





चित्रसंख्या - 61

## प्रध्वंसाभावः





चित्रसंख्या - 62

## अत्यन्ताभावः




चित्रसंख्या - 60

## प्रागभावः





चित्रसंख्या - 61

## प्रध्वंसाभावः





चित्रसंख्या - 62

## अत्यन्ताभावः



चित्रसंख्या - 63

## अन्योन्याभावः




चित्रसंख्या - 64 ·

रेखाचित्रेऽस्मिन् अलौकिकसन्निकर्षाणां निरूपणं कृतम् । तत्र सामान्यलक्षणसन्निकर्षेण यत्रयत्र धूमः तत्र तत्र वह्निरिति व्याप्तेः प्रत्यक्षो भवति । यद्यपि समग्रे संसारे वर्त्तमानानां धूमवह्निव्यक्तीनां लौकिकसन्निकर्षेण (संयोगेन) प्रत्यक्षं नैव सम्भवति तथापि संयोगसन्निकर्षेण गृहितानां केषाञ्चित् धूमवह्निव्यक्तीनां तु प्रत्यक्षं भवत्येव । येनेन्द्रियेण यद् गृह्यते तद्गताजातिरपि तेनैव इन्द्रियेण गृह्यत इति सिद्धान्तेन तेषां केषाञ्चितधूमवह्निनिष्ठधूमत्ववह्नित्वजातिद्वयस्याऽपि प्रत्यक्षं भवति । संसारे वर्त्तमानानां सर्वेषां धूमवह्निव्यक्तीनां धूमत्ववह्नित्वजात्योः एकैकत्वात्, जातिरेव सामान्यपदेन उच्यते इति कृत्वा । सामान्यमेव तत्र सन्निकर्षत्वं भजते । येन लौकिकप्रत्यक्षाविषयाणां सर्वेषां धूमव्यक्तीनां वह्निव्यक्तीनां च प्रत्यक्षं सामान्यलक्षण-(स्वरूप)-अलौकिकसन्निकर्षेण प्रत्यक्षीक्रियते इति न्यायवैशेषिकसिद्धान्तः । अतएव सर्वोपसंहारवती व्याप्तिः सामान्यलक्षणा-प्रत्यासत्त्या गृह्यते ।

तत्रैव ज्ञानलक्षणसन्निकर्षेण चन्दनस्य सौरभविषयकं चाक्षुष-प्रत्यक्षं भवति इति प्रदर्शितमस्ति ।

गन्धविषयकं प्रत्यक्षं तु घ्राणेन्द्रियेण भवति । तत्कथं चक्षुषा स्यात् । चक्षुषा साकं सौरभस्य न कोऽपि लौकिकसन्निकर्षोऽस्ति अत्र ज्ञानमेव सन्निकर्षस्य कार्यं मरोति । तत्र ज्ञानं नाम सौरभविषयकपूर्वानु-भवजनितसंस्कारजन्यस्मृतिज्ञानं वोध्यम् । दूरतः चन्दनं काष्ठं दृष्टवा तच्चन्दनं सुरभिरिति चाक्षुषप्रत्यक्षमस्माकं भवति । अत्र चन्दनकाष्ठेन साकं चक्षुरिन्द्रियस्य संयोगसम्वन्धो वर्त्तते । तदानीं चन्दनगतसौरभविषयकसंस्कारस्य उद्वोधात् सौरभस्मृतिरुदेति, तदेव स्मृतिज्ञानं सन्निकर्षो भूत्वा सौरभविषयकं चाक्षुषप्रत्यक्षं समुत्पादयति । तदेवस्मृतिज्ञानं ज्ञानलक्षणाप्रत्यासत्तिनाम अलौकिकसन्निकर्षविशेषः ।

पुनश्च योगजसन्निकर्ष इति अपर अलौकिकसन्निकर्षविशेषः तत्र प्रतिपादितः । योगी द्विविधः । युक्तयोगी युञ्जानयोगी च । यः युक्तयोगी, तस्य सर्वविषयकालौकिकप्रत्यक्षं सम्भवति । योगजधर्मबलात् स दूरस्थामपि वर्थं प्रत्यक्षेण ग्रहीतुं शक्नोति यद्यपि तेन अर्थेन साकं तस्य चक्षुषः संयोगसन्निकर्षो नास्ति, तथापि योगजधर्मबलात् अलौकिसन्निकर्षविशेषात् तस्य चाक्षुपप्रत्यक्षं सम्भवति । युक्तस्य सर्वदा भानम् । युञ्जानयोगी दूरस्थं पदार्थं प्रत्यक्षेण जानाति परन्तु स चिन्तन-माध्यमेन जानाति तस्य सर्वदा भानं नास्ति ।

चित्रसंख्या-65·

चित्रमेतत् प्रत्यक्षज्ञानस्य लक्षणं निरूपयित्वा प्रत्यक्षज्ञानस्य प्रमाप्रमाभेदेन द्विविधत्वं प्रदर्शयति । प्रमालक्षणम् अप्रमालक्षणं च सोदाहरणं प्रतिपादयति ।

चित्रसंख्या-66·

इदं चित्र संशयलक्षणं निरूप्य तस्य द्विकोटिकत्वं चतुष्कोटिकत्वं च सोदाहरणं प्रतिपादयति ।

चित्रसंख्या-67·


अस्मिन् चित्रे मीमांसकसम्मतप्रामाण्यवादस्य स्वरूपं प्रतिपादितम् । तत्राऽपि प्राभाकराणां भट्टानां मुरारीमिश्राणां च मतानि चित्रितानि ।

चित्रसंख्या-68·

चित्रेऽस्मिन् नैयायिकसम्मतः परतः प्रमाण्यवादः परतः अप्रामाण्यवादश्च निरूपितः ।


चित्रसंख्या - 64

अलौकिकसन्निकर्षः




चित्रसंख्या - 65

## प्रत्यक्षज्ञानम्





चित्रसंख्या - 66

## संशयः



चित्रसंख्या - 67




चित्रसंख्या-69·

चित्रेऽस्मिन् अनुमानप्रमाणस्य लक्षणोदाहरणमुखेन सचित्रप्रदर्शनं कृतम् । तत्र भूयोदर्शनेन व्याप्तिज्ञानं कथं भवति । तदनन्तरं पर्वतादिदेशे धूमदर्शनं तदनु परामर्शः कथं भवति तत्प्रदर्शितम् । तदनन्तरम् अनुमितिर्भवति इति दर्शितम् ।

चित्रसंख्या-70·

अस्मिन् चित्रे केवलान्वयि-केवलव्यतिरेकि-अन्वयव्यतिरेक्यनुमानानां रूपं प्रकाश्य तत्र केवलान्वयिहेतो चतुरूपोपन्नत्वं केवलव्यतिरेकिहेतोः चतुरूपोपन्नत्वं तथा अन्वयव्यतिरेकिहेतोः पञ्चरूपोपपन्नत्वं प्रदर्शितम् ।

चित्रसंख्या-71-72-73·

अत्र केवलान्वयनुमानस्य उदाहरणे लक्षणसमन्वयः प्रदर्शितः । दिसप्तिततमचित्रे केवलव्यतिरेक्यनुमानस्य तथा त्रिसप्ततितमचित्रे अन्वयव्यतिरेक्यनुमानस्य उदाहरणमुखेन तत्तल्लक्षणसमन्वयः प्रदर्शितः ।

चित्रसंख्या-74·

चित्रेऽस्मिन् स्वार्थानुमानपरार्थानुमानयो र्भेदः सोदाहरणं प्रदत्तः ।

चित्रसंख्या-75·

हेत्वाभासस्य सामान्यलक्षणं, तस्य च पञ्चभेदाः उपभेदसहिताः चित्रेऽस्मिन् प्रदर्शिताः ।

चित्रसंख्या-76-77-78·

चित्रत्रये साधारणासाधारणानुपसंहारिसव्यभिचराणां क्रमशः प्रदर्शनं सोदाहरणं कृतम् ।

**चित्रसंख्या-79·**

विरुद्धहेत्वाभासस्य चित्रणमत्र वर्त्तते ।

**चित्रसंख्या-80-81-82·**

चित्रत्रये अविद्धहेत्वाभासस्य आश्रयासिद्धः, स्वरूपासिद्धः, व्याप्यत्वासिद्ध इति भेदत्रयं प्रदर्शितम् ।

**चित्रसंख्या-83-84·**

चित्रद्वये सत्प्रतिपक्षबाधहेत्वाभासयोः क्रमशः प्रदर्शनमस्ति ।


**चित्रसंख्या-85·**

उपमानप्रमाणस्य निरूपणं चित्रेऽस्मिन् वर्त्तते ।

**चित्रसंख्या-86·**


शब्दप्रमाणस्य निरूपणं चित्रेऽस्मिन् कृतम् ।

चित्रसंख्या - 69




चित्रसंख्या - 70

## अनुमानभेदः ①





चित्रसंख्या - 71

## केवलान्वय्यनुमानम्




चित्रसंख्या - 72

## केवलव्यतिरेक्यनुमानम्





चित्रसंख्या - 73

## अन्वयव्यतिरेक्यनुमानम्




चित्रसंख्या - 74

## अनुमानभेदः ②





चित्रसंख्या - 75

## हेत्वाभासाः



चित्रसंख्या - 76


## साधारणसव्यभिचारः




सत्तायाः पक्ष (द्रव्य) विपक्ष (गुणकर्म) वृत्तित्वात्


चित्रसंख्या - 77

## असाधारणसव्यभिचारः




चित्रसंख्या - ७८

## अनुपसंहारी सव्यभिचारः





चित्रसंख्या - ७९


## विरुद्ध हेत्वाभासः




चित्रसंख्या - ४०




चित्रसंख्या - ४१





चित्रसंख्या - ४२




चित्रसंख्या - ४३

## सत्प्रतिपक्षः





चित्रसंख्या - ४४

## बाधहेत्वाभासः




चित्रसंख्या - ८५

## उपमानप्रमाणम्




चित्रसंख्या - ८६

## शब्दप्रमाणम्




1 (आकाङ्क्षा) पदोत्तरपदसमभिव्याहारः। (पदस्य पदान्तरव्यतिरेकप्रयुक्त-अन्वयाननुभावकत्वमाकाङ्क्षा)

2 (योग्यता) एकपदार्थेऽपरपदार्थसंसर्गवत्ता। (अर्थाबाधो योग्यता)

3 (आसत्तिः) पदाव्यवधानमासत्तिः। (पदानामविलम्बेनोच्चारणम्)